International Journal of Multidisciplinary Horizon

ISSN:**3049-2017**
IJMH 2025; 2(5): 156-158
© 2025 IJMH
www.themultijournal.com

Received: 10-10-2025
Accepted: 27-10-2025
Publish : 28-10-2025

**अञ्जलीपालः**
साहित्यविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः.
श्रीसदाशिवपरिसरः,
पुरी, ओडिशा

**Correspondence:**
**अञ्जलीपालः**
साहित्यविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः.
श्रीसदाशिवपरिसरः,
पुरी, ओडिशा

# गीतगोविन्दे शृङ्गाररसध्वनिविमर्शः

**अञ्जलीपालः**

भक्तिभावपूर्णे श्रीजयदेवविरचिते श्रीगीतगोविन्दकाव्ये अङ्गिरसरूपेण विद्यमानस्य शृङ्गार रसस्यास्य पूर्णता सहृदयहृदयानि नितरां ह्लादयति। अत्र शृङ्गाररससम्बन्धिनः श्लोकाः इतस्ततः दृश्यन्ते। न केवलं श्लोकानामाधिक्येन एव शृङ्गाररसस्य अधिकता दृश्यते, अपि तु कस्मिंश्चित् श्लोके कविना स्वयं काव्यस्यास्य शृङ्गारोपजीव्यत्वं ख्यापितम्। वस्तुतः कवेर्मतेन भगवान् श्रीकृष्ण एव शृङ्गारस्वरूपः। तथाहि[१]।

श्लोकेनानेन काव्यस्यास्य शृङ्गारत्वं सुन्दरं स्फुटति। श्लोकेनानेन कविर्जयदेवः भणति यत् - विश्वं यः अनुरञ्जयति स हरिः अद्य वसन्ते विलसति। विश्वे स्थितानां सर्वेषामणूनां परमाणूनां च ब्रह्मादिस्तम्बपर्यन्तं सर्वेषां यथाभावं रञ्जनम् अनुरञ्जनम् इत्युच्यते। सर्वान् च स्वस्वक्षेत्रेषु विकासयन् तेषां पूर्णताप्रदानमेव विश्वस्य अनुरञ्जनम् इति वा वक्तुं शक्यते। नीलपद्मम् इव तस्य सुन्दरश्यामलं, कोमलं च अङ्गम् अनङ्गस्य उत्सवक्षेत्रम्। एतादृशः मूर्तिमान् शृङ्गाररसः व्रजाङ्गनानाम् आलिङ्गनादिना हृष्टः सन् आनन्दमुत्पादयति। ह्लाद एव विश्वम् ह्लादयति। श्रीरासभूमिरेव रसविलासभूमिः, आनन्दस्य प्रस्रवणम्। तस्मादुत्थितम् अमृतम् एव जगत् सञ्जीवयति। रसशास्त्रकाराणां वैष्णवाणां मतमत्र सूक्ष्मेक्षिकया परिशीलनीया वर्तते। यतो हि वैष्णवानां मते तु शृङ्गारस्य अर्थः जीवनाधायकत्वेन वर्तते। तथाहि रसशास्त्रकाराणां मते तु[२]।

सम्भोगेच्छाया समुद्भेद एव शृङ्गमित्युच्यते। इयमिच्छा यत्र पूर्णा स्यात् स शृङ्गार इत्युच्यते। वैष्णवालंकारिकाणां मते उज्ज्वलश्यामवर्णीऽयोऽयं रसः। अस्य चाधिष्ठाता भगवान् श्रीकृष्णः। भगवान् श्रीकृष्णः रसस्य एवाधिष्ठाता, शृङ्गारश्च अधिष्ठानम्। अयञ्च रसः आदिरस इत्यपि उच्यते वैष्णवैः।

श्रुतावप्युक्तं भगवान् रसस्वरूपः - 'रसो वै सः' इति। अतः सर्वेषां रसानां मूलत्वेन आदित्वेन च स एव आदिरस इत्युच्यते। अस्य रसस्य एव परिणतिस्वरूपः भवति आनन्दः। श्रीकृष्णे अनुस्यूतत्वात् विश्वस्य मूलभूतोऽयं रसः, विश्वस्य भरणमपि करोति तथा विश्वस्य लये अपि अस्यैव रसस्य स्थितिः स्यात्[३]।

निखिलं भूतजगत् आनन्दादेव जायते। आनन्दे एव जीवन्ति, आनन्दं प्रविश्य च लयमाविशन्ति। अत एव विश्वस्य आदौ मध्ये अन्ते च अयमेव रसो वर्तते। अस्य आदिरसस्य विलासेन अर्थात् आनन्दादेव विश्वं सृज्यते। सत्यसङ्कल्पो भगवान् सङ्कल्पते - "एकोऽहं बहुस्यां प्रजायेय" इति। एवंरूपेण विलासात् अर्थात् बहुरूपतादानादेव विश्वं सृज्यते। न केवलमेकेन विलासः क्रीडा वा सम्भवेत्। पुनश्च बहुत्वापादनाय शक्तिरपेक्षते। अत एव रसस्य विलासः आनन्दो वा तच्छक्त्या एव सम्पाद्यते। शक्तिमतः ईश्वरस्य त्रिविधा माया तावत् - बहिरङ्गमायाशक्तिः, तटस्थजीवशक्तिः, अन्तरङ्गस्वरूपशक्तिः चेति। इयं त्रिविधा शक्तिरेव सत् चित् आनन्दश्चेति उच्यते।

जगत उत्पत्तौ शृङ्गाररसस्य महत्ता वैष्णवैः भूरिशः अङ्गीकृता। श्रीमद्भगवद्गीतायामुक्तम् यत्[४]। चतुर्दशाध्यायेऽप्युक्तम्[५]।

एवंरूपेण भगवतः बहुत्वापादनं शृङ्गाररसस्य दिग्विशेषो वर्तते। उक्तञ्चान्यत्र 'प्रजनश्चास्मि कन्दर्पः' इति। विष्णुपुराणे अयमेव ह्लादकारी अर्थात् मनःप्रसादिता सात्त्विकी वृत्तिः इत्युक्तम्। अस्यैव

पारवश्यात् आबह्मोकालात् जीवाः जीवन्ति। अस्यैव शृङ्गारमूलस्य कामस्य विस्तारः तृणाद् वृक्षपर्यन्तम्, कीटात् पशुपर्यन्तं, मनुष्येष्वपि वर्तते। अयं काम एव जगतः सर्वोत्कृष्टा आनन्ददायिनी वृत्तिः, अयमेव सृष्टिहेतुः, अयमेव जीवानां साधारणधर्मः। प्रजननं विहाय सृष्टेः इयं धारा कथं वा चलेत्। न केवलं सृष्टिविषये अपि तु जगतः स्थितावपि अयं काम एव वर्तते।

मनुष्या बहुत्वमिच्छन्ति। इयं च प्रवृतिरनादिकालात्प्रवहति। अस्य च द्वेदिशे वर्तेते। दैवी दिक् प्रथमा, आसुरी च द्वितीया।

असुरा अपि बहुत्वमिच्छन्ति। परन्तु ते भोगेन सर्वं जेतुमिच्छन्ति, अन्यान् हत्वा सर्वं प्राप्तुमिच्छन्ति। प्रसभं देवानां यज्ञभागं गृहीत्वा ते देवता भवितुमिच्छन्ति। देवत्वलाभाय साधनं कर्तुं ते नेच्छन्ति। जगति विद्यमानं सर्वमेव तेषां सुखाय एव, तेषां भोगाय एव, तस्य आनन्दाय एव इति। अत्रापि मूलभूतः काम एव। कामः महाशनः। अस्य विनाशः कर्तुं न शक्यते चेत् अस्य बभुक्षा दुष्पूरणीया भवति। कंसादिषु एवंविधा प्रवृत्तिर्दृष्यते। मनुष्येष्वपि केचन एवंविधप्रवृत्तिमन्तो दृश्यन्ते। परन्तु दैवी-पन्था नैवंविधोऽस्ति। मार्गमेनमाश्रयन्तः स्वात्मानं व्यञ्जयन्ति। ते आत्मानं सर्वेषु हृदयेषु प्रतिष्ठापयितुमिच्छन्ति। त्यागमार्गे तथा आत्मप्रसारणमार्गे एव तेषां गतिर्वर्तते। एवंविधपृथक्मार्गः मायया एव सृष्टः। माया हि शब्द-स्पर्श-रूप-रस-गन्धैः उल्लसितरूपं वस्तु संसृज्य जगत् स्वात्मानं प्रति कर्षति। ये तावत् आसुरीं प्रवृत्तिमनुसरन्ति ते अवशाः अस्यां मायायाम् आत्मानं समर्पयन्ति। इयं च या स्थितिः सा शृङ्गारस्यैव काचन दिग्वर्तते।

मनुष्येषु प्रवृत्तिद्वयं वर्तते। तम् एका प्रवृत्तिरन्तर्मुखिनं करोति, अपरा च बहिर्मुखिनं करोति। एका विद्या अपरा अविद्या। अस्मात् संसाराद्बहिः निस्सरणाय विद्याया आश्रयणं करणीयम्। परन्तु भगवान् विद्यायाम् अविद्यायां च पारङ्गतः। तेन सह साक्षात्कारः करणीयश्चेत् विद्याविद्ययोः पारः अस्माभिः गन्तव्यः।

जीवाः भगवतः तटस्था शक्तिः, तस्य एव प्रकृतयः। श्रीभगवता उक्तम्- भुमिः जलं अग्निः, वायुः, आकाशम्, मनः, बुद्धिः, अहंकारः इत्येतान् अष्टौ विहाय परा प्रकृतिः अन्या काचन मे वर्तते, तेन जीवभूतप्रकृत्या एव अहम् इदं जगत् धारयामि[६]।

पूर्वोक्तानाम् अष्टविधानां प्रकृतीनां स्वशक्तिः कापि न वर्तते। श्रीभगवता उक्तम् - मयाध्यक्षेण प्रकृतिः सूयते सा चराचरम्[७]।

श्रीमद्भागवतेऽपि उक्तम्[८]।

अत एव इयं प्रकृतिः न स्वतन्त्रा। न केवलं पञ्चतन्मात्राणामपि तु मनोबुद्ध्यहंकाराणामपि सर्जनशक्तिर्न विद्यते। विषयाभावे मनसः कार्यं न स्यात्, इन्द्रियाभावे मनसः विषयाभावो भवति। इदं मनः इन्द्रियाणि बुद्धिः न तिष्ठति चेत् बुद्धिरपि निष्क्रिया भवति। बुद्धिः निष्क्रिया भवति चेत् अहङ्कारोऽपि जडवद्भवति।

परन्तु परा प्रकृतिविशिष्टानां जीवानां विषये न तथा। जगदिदं तस्या एव आधारेण विधृतमस्ति। जीवा न भवन्ति चेत् जगद्गतानां रूपरसगन्धस्पर्श-शब्दानां सार्थक्यमेव न भवति। भूम्याद्यहंकारात्मकस्य जगतः आधाररूपाः भवन्ति जीवाः। अस्या एव जीवप्रकृतेः कश्चन एकः अंशः जगत् अपरः अंशः भगवान्। सर्वेषू जीवेषु श्रेष्ठः जीवः मनुष्यः। एतेषु मनुष्येषु केचन जगन्मायया मत्ताः सन्ति, केचन वा भगवन्तं पूजयन्ति। एतादृशं द्वैविध्यमेव दैवासुरप्रवृत्तिरिति कथ्यते।

पुरुषार्थानुगुणं एतयोः द्वयोरपि विविधाः श्रेणयः भवन्ति। जीवाः अन्तर्मुखिनो वा भवन्तु बहिर्मुखिनो वा, पुरुषार्थमतिक्रान्तुं ते असमर्थाः। चतुर्षु पुरुषार्थेषु धर्मः अर्थश्च साधनमात्रम्। अर्थात् धर्मेण अर्थेन वा सुखं न लभ्यते, सुखम् अनेन सहायेन आयातीति कृत्वा एते साधने इत्युच्यते। एतद्विषये यद्यपि मतानैक्यं वर्तते तथापि काममोक्षयोर्विषये नास्ति कोऽपि मतभेदः। भोगस्य अनुभूतिस्वरूपः कामः, भगवत्स्वरूपे आत्मविलय एव मोक्षः। वैष्णवाः मोक्षं कैतवधर्म इति चिन्तयन्तः तन्निन्दां चक्रुः। यतः मोक्षाय 'सोऽहम्' इति भावना अपेक्षते। इयं च भावना वैष्णवानामनुरोधेन अपराधं जनयति। विचारे क्रियमाणे एवं दृश्यते यत् जगति मोक्षचिन्तायां किमपि स्थानं नास्ति। यतः भगवान् जीवप्रवाहस्य सहायेन जगत् नियन्त्रयति। मोक्षमार्गः तस्य विपरीतमार्ग इति फलत्वेन समायाति। परन्तु एतस्मात् काम एव जगत् रक्षयति, जीवस्य येन अमुभवेन जगतः स्थितिर्वर्तते स एव कामः। कामाभावे जगतः अस्तित्वमेव न स्यात्। परन्तु इयमनुभूतिः मायया नियन्त्रिता वर्तते, परन्तु अन्तः वर्तमाना अनुभूतिः अमायिकी, सा च भगवदनुभूतिः। इयमपि योगमायया सहायतां विना नैव सुसम्पद्यते। मायां स्वायत्तीकृत्य तत्पारंगतः सन्नेव भगवदनुभूतिः आस्वादयितुं शक्यते। अनयोः अन्तरनुभूतिबहिरनुभूत्योः मिथो मेलनेन या उपलब्धिः सञ्जायते, से एव शृङ्गाररसः। ब्रह्मसंहितायां तदुक्तम्[९]।

यः आनन्दचिन्मयरसालिङ्गित भुवनमोहनस्य केन्द्रबिन्दुः निखिल-प्राणि-नामन्तःकरणे प्रतिफलितं सत् स्मरलीलया अखिलं भुवनं जयति, तम् आदि-पुरुषं गोविन्दमहं नमामि इति श्लोकस्य अर्थः।

यः स्वकीयेन अंशेन स्मरतामुपेत्य बहुरूपेण जगत् असृजत्, स स्वयमेव प्रकारान्तरेण साक्षात् मन्मथरूपेण आनन्दचिन्मयर-सात्मतया रासविलासे बहूनाम् आलिङ्गनेन बद्धः सन् अद्वयतत्त्वस्य स्वरूपं प्रकाशयति। स्मररूपेण यः निखिलं जगत् मोहयति, स वृन्दावने अप्राकृतनवीनमदनरूरेण स्वात्मानमेव दृष्ट्वा हृष्टो जायते। उक्तञ्च[१०]।

रूप देखि आपनार कृष्णेर हय चमत्कार
आस्वादिते मने उठे काम।।

एतादृशात् आनन्दात् तं रक्षयितुं कस्यापि सामर्थ्यमपि न विद्यते। या च समर्था अस्ति सा श्रीराधा। कविराजः जयदेवः राधाप्रेम्णः प्रकटने अन्यतमः श्रेष्ठः कविः। राधाप्रेम्णः महिम्नं ख्यापयता कृष्णदासकविराजेन उक्तम्[११]।

एतादृशः शृङ्गाररस एव अस्य काव्यस्य अङ्गिरसत्वेन विराजते। अनुप्रासयमकादिभिः शब्दालंकारैः सह विविधैः अर्थालंकारैः अस्य ग्रन्थस्य शृङ्गाररसः प्रस्फुटितः दृश्यते। दिङ्मात्रमुदाहरणं प्रस्तू-यतेऽधः[१२]।

कन्दर्पज्वरेण प्रियविरहोद्भूतकामसन्तापेन जनिता या चिन्ता, कथं तु प्राप्स्यामीति भावना, तया जातया आकुलतया प्रतिक्षणविल-क्षणतया वर्धमाना बाधा दुःखं यस्यास्तादृशी, सखीप्रेषणानन्तरं समाधायकासम्बिधाने उद्वेल-मन्मथव्यथाकृताभिः विविधाभिः चिन्ताभिः आकुलीकृता सा इति न, किन्तु आकुलतैव सम्पन्नेति भावप्राधानं प्रतिपादयता तल्-प्रत्ययेन बाधास्फुरणाना-मतिदुरन्तत्वं सूचितम्[१३]।

अत्र वसन्तसमये गन्धवाहो मलयानिलश्च विरहिजनानां चेतो दहति। किमर्थं निरपराधानां चेतो दहति इति चेत् उच्यते - विरहिजनजयाय सर्वतः सञ्चरतः असमबाणस्य कामदेवस्य परितोषाय। इह स्थितौ विरहिण्याः राधायाः विरहव्यथापि समुचिता एव।

द्वितीयसर्गे विरहिण्याः राधायाः मनोगतां भावनां वर्णयति[१४]।

श्रीराधां वीक्ष्य विस्मयान्वितं, स्मितमुखं, मुग्धाननं, हस्तस्त-स्तवंशं, व्रजसुन्दरीभिः परिवृतं, भगवन्तं श्रीकृष्णं राधा वीक्ष्य नितरां हृष्टा सञ्जाता इति श्लोकस्य सरलार्थः। अत्र सम्भोग-शृङ्गाररसः व्यज्यते।

**पादटिप्पणी**

१.विश्लेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवर-
श्रेणीश्यामलकोमलैरुपनयन्नङ्गैरनङ्गोत्सवम्।
स्वच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः
शृङ्गारः सखि मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति।।
गीतगोविन्द , १.९, पृ.४३

२. शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः।
उत्तमप्रकृतिप्राये रसः शृङ्गार इष्यते।।
सा.द.२/४,

३. आनन्दाद् एव खल्विमानि भूतानि जायन्ते।
आनन्देन जातानि जीवन्ति, आनन्दं प्रयन्त्यभिसंविशन्ति।।
ऐतरेयोपनिषद्, - ३.६

४. प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात्।।
श्रीमद्भगवद्गीता - ९.८

५. मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्।
सम्भवः सर्वभूतानां ततो भवति भारत।।
सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति या।
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता।।
श्रीमद्भगवद्गीता - १४.३,४

६. अपरेयमितस्त्वन्यां प्रकृतिं बिद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत्।।
श्रीमद्भगवद्गीता - ७.५

७.श्रीमद्भागवतम् - ६/७५

८. दैवात् क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान्।
आधत्त वीर्यं सासूत महत्तत्त्वं हिरण्मयम्।। इति।
श्रीमद्भागवतम् - ३.२६.१९

९. आनन्दचिन्मयरसात्मतया मनःसु
यः प्राणिनां प्रतिफल स्मरतामुपेत्य।
लीलायितेन भुवनानि जयत्यजस्रं
गोविन्दमादिपुरुषं तमहं भजामि।।
वैष्णव.पदा. पृ.२४

१०.पदा.सा.४/३७

११.राधासङ्गे यदाभाति तदा मदनमोहनः।
अन्यथा विश्वमोहोऽपि स्वयं मदन-मोहितः।। इति।।
गीतगोविन्दम्, ६/९

१२. वसन्ते वासन्तीकुसुमसुकुमारैर्वयवै-
र्भ्रमन्तीं कान्तारे बहुविहितकृष्णानुसरणाम्।
अमन्दं कन्दर्पज्वरजनितचिन्ताकुलतया
बलद्बाधां राधां सरसमिदमूचे सहचरी।।
गीतगोविन्दम्, १/७

१३.दरविदलितवल्लीमल्लिचञ्चत्पराग-
प्रकटितपरवासैर्वासयन् काननानि।
इह हि दहति चेतः केतकीगन्धबन्धुः
प्रसरदसमबाणप्राणवद्गन्धवाहः।।
गीतगोविन्दम्, १/८

१४.हस्तत्रस्तविलासवंशमनृजुभ्रूवल्लिमद्बल्लवी
वृन्दोत्सारिदृगन्तवीक्षितमतिस्वेदार्द्रगण्डस्थलम्।
मामुद्वीक्ष्य विलक्षितं स्मितसुधामुग्धाननं कानने
गोविन्दं व्रजसुन्दरीगणवृतं पश्यामि हृष्यामि च।।
गीतगोविन्दम्, २/३